# ॥ श्री विष्णु सहस्रनाम स्तोत्रम् ॥

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्न वदनं ध्यायेत् सर्व विघ्नोपशान्तये ॥

यस्य द्विरद वक्त्राद्याः पारिषद्याः परश्शतम् ।
विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये ॥

व्यासं वसिष्ठ नप्तारं शक्तेः पौत्रं अकल्मषम् ।
पराशरात्मजं वन्दे शुखतातं तपोनिधिम् ॥

व्यासाय विष्णु रूपाय व्यास रूपाय विष्णवे ।
नमो वै ब्रह्म निधये वासिष्ठाय नमो नमः ॥

अविकाराय शुद्धाय नित्याय परमात्मने ।
सदैकरूप रूपाय विष्णवे सर्व जिष्णवे ॥

यस्य स्मरण मात्रेण जन्म संसार बन्धनात् ।
विमुच्यते नमस्तस्मै विष्णवे प्रभ विष्णवे ॥
ॐ नमो विष्णवे प्रभ विष्णवे ॥

---

श्री वैशम्पायन उवाच
श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः ।
युधिष्ठिरः शान्तनवं पुनरेवाभ्य भाषत ॥

युधिष्ठिर उवाच
किमेकं दैवतं लोके किं वाऽप्येकं परायणम् ।
स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर् मानवाः शुभम् ॥

को धर्मः सर्व धर्माणां भवतः परमो मतः ।
किं जपन् मुच्यते जन्तुर् जन्म संसार बन्धनात् ॥

श्री भीष्म उवच
जगत्प्रभुं देव देवं अनन्तं पुरुषोत्तमम् ।
स्तुवन् नाम सहस्रेण पुरुषः सततोत्थितः ॥

तमेव चार्चयन् नित्यं भक्त्या पुरुशं अव्ययम् ।
ध्यायन् स्तुवन् नमस्यंश्च यजमानस् तमेव च ॥

अनादि निधनं विष्णुं सर्व लोक महेश्वरम् ।
लोकाध्यक्षं स्तुवन् नित्यं सर्व दुःखाधिगो भवेत् ॥

ब्रह्मण्यं सर्व धर्मज्ञं लोकानां कीर्ति वर्धनम् ।
लोकनाथं महद्भूतं सर्व भूत भवोद् भवम् ॥

एष मे सर्व धर्माणां धर्मोऽधिकतमो मतः ।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन् नरः सदाः ॥

परमं यो महत् तेजः परमं यो महत् तपः ।
परमं यो महद् ब्रह्म परमं यः परायणम् ॥

पवित्राणां पवित्रं यो मङ्गळानां च मङ्गळम् ।
दैवतं देवतानां च भूतानां योऽव्ययः पिता ॥

यतः सर्वाणि भूतानि भवन्त्यादि युगागमे ।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ॥

तस्य लोक प्रधानस्य जगन्नाथस्य भूपते ।
विष्णोर् नाम सहस्रं मे श्रुणु पाप भयापहम् ॥

यानि नामानि गौणानि विख्यातानि महात्मनः ।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ॥

ऋषिर् नाम्नां सहस्रस्य वेदव्यासो महा मुनिः ।
छन्दोऽनुष्टुप् तथा देवो भगवान् देवकी सुतः ॥

अम्रुतां शूद्भवो बीजं शक्तिर् देवकि नन्दनः ।
त्रिसामा हृदयं तस्य शान्त्यर्थे विनियुज्यते ॥

विष्णुं जिष्णुं महा विष्णुं प्रभ विष्णुं महेश्वरम् ।
अनेक रूप दैत्यान्तं नमामि पुरुषोत्तमम् ॥

अस्य श्री विष्णोर् दिव्य सहस्रनाम स्तोत्र महा मन्त्रस्य ।
श्री वेदव्यासो भगवान् ऋषिः ।
अनुश्टुप् छन्दः ।
श्री महाविष्णुः परमात्मा श्रीमन् नारायणो देवता ।
अमृतां शूद्भवो भानुरिति बीजम् ।
देवकी नन्दनः स्रष्टेति शक्तिः ।
उद्भवः क्षोभणो देव इति परमो मन्त्रः ।
शङ्खभृन् नन्दकी चक्रीति कीलकम् ।
शार्ङ्गधन्वा गदाधर इत्यस्त्रम् ।
रथान्गपाणिर् अक्षोभ्य इति नेत्रम् ।
त्रिसामा सामगः सामेति कवचम् ।
आनन्दं परब्रह्मेति योनिः ।
ऋतुः सुदर्शनः काल इति दिग्बन्धः ।
श्री विश्व रूप इति ध्यानम् ।
श्री महाविष्णु कैङ्कर्य रूपे सहस्रनाम जपे विनियोगः ।

---

## ध्यानम्

क्षीरो धन्वत् प्रदेशे शुचिमणि विलसत् सैकते मौक्तिकानां
माला क्लुप्ता सनस्थः स्फटिकमणि निभैर् मौक्तिकैर् मण्डिताङ्गः ।
शुभ्रैरभ्रै रदभ्रैर् उपरि विरचितैर् मुक्त पीयूष वर्षैः
आनन्दी नः पुनीयादरिनलिन गदा शङ्खपाणिर् मुकुन्दः ।
भूः पादौ यस्य नाभिर् वियदसुरनिलश् चन्द्र सूर्यौ च नेत्रे ।
कर्णा वाशाः शिरो द्यौर् मुखमपि दहनो यस्य वास्तेयमब्धिः ।
अन्तःस्थं यस्य विश्वं सुर नर खग गो भोगि गन्धर्व दैत्यैः ।
चित्रं रंरम्यते तं त्रिभुवन वपुषं विष्णुमीशं नमामि ॥

शान्ताकारं भुजग शयनं पद्मनाभं सुरेशं
विश्वाधारं गगन सदृशं मेघवर्णं शुभाङ्गम् ।

लक्ष्मी कान्तं कमल नयनं योगिहृद् ध्यान गम्यं
वन्दे विष्णुं भव भय हरं सर्व लोकैक नाथम् ॥

मेघश्यामं पीतकौशेय वासं
श्रीवत्साङ्कं कौस्तुभोद् भासि ताङ्गम् ।
पुन्योपेतं पुण्डरीकायताक्षं
विष्णुं वन्दे सर्व लोकैक नाथम् ॥

सशङ्ख चक्रं सकिरीट कुण्डलं
सपीत वस्त्रं सरसीरु हेक्षणम् ।
सहार वक्षःस्थल शोभि कौस्तुभं
नमामि विष्णुं शिरसा चतुर्भुजम् ॥
छायायां पारिजातस्य हेमसिंहासनो परि ।
आसीनमम्बुद श्यामं आयताक्षं अलङ्कृतम् ॥

चन्द्राननं चतुर् बाहुं श्रीवत्साङ्कित वक्षसम् ।
रुक्मिणी सत्यभामाभ्यां सहितं कृश्णं आश्रये ॥

---

ॐ विश्वं, विष्णुर्, वषट्कारो, भूत भव्य भवत्प्रभुः ।
भूथ कृद्, भूध बृद्, भावो, भूतात्मा, भूत भावनः ॥ 1

पूतात्मा, परमात्मा च, मुक्तानां परमा गतिः ।
अव्ययः, पुरुषः, साक्षी, क्षेत्रज्ञ, अक्षर एव च ॥ 2

योगो, योगविदां नेता, प्रधान पुरुषेश्वरः ।
नारसिंहवपुः, श्रीमान्, केशवः, पुरुषोत्तमः ॥ 3

सर्वः, शर्वः, शिवः, स्थाणुर्, भूतादिर्, निधिर् अव्ययः ।
सम्भवो, भावनो, भर्ता, प्रभवः, प्रभुर्, ईश्वरः ॥ 4

स्वयंभूः, शंभुर्, आदित्यः, पुष्कराक्षो, महास्वनः ।
अनादि निधनो, धाता, विधाता, धातुर् उत्तमः ॥ 5

अप्रमेयो, हृषीकेशः, पद्मनाभो, अमर प्रभुः ।
विश्वकर्मा, मनुस्, त्वष्टा, स्थविष्ठः, स्थविरो, धृवः ॥ 6

अग्राह्य, शाश्वतः, कृष्णो, लोहिताक्षः, प्रतर्दनः ।
प्रभूतस्, त्रिककुद्धाम, पवित्रं, मङ्गळं परम् ॥ 7

ईशानः, प्राणदः, प्राणो, ज्येष्ठः, स्रेष्ठः, प्रजापतिः ।
हिरण्य गर्भो, भू गर्भो, माधवो, मधुसूदनः ॥ 8

ईश्वरो, विक्रमी, धन्वी, मेधावी, विक्रमः, क्रमः ।
अनुत्तमो, दुराधर्षः, कृतज्ञः, कृतिर्, आत्मवान् ॥ 9

सुरेशः, शरणं, शर्म, विश्वरेताः, प्रजा भवः ।
अहस्, संवत्सरो, व्याळः, प्रत्ययः, सर्व दर्शनः ॥ 10

अजस्, सर्वेश्वरः, सिद्धः, सिद्धिः, सर्वादिर्, अच्युतः ।
वृषाकपिर्, अमेयात्मा, सर्व योग विनिस्सृतः ॥ 11

वसुर्, वसुमनास्, सत्यस्, समात्मा, सम्मितस्, समः ।
अमोघः, पुण्डरीकाक्षो, वृषकर्मा, वृषाकृतिः ॥ 12

रुद्रो, बहुशिरा, बभ्रुर्, विश्वयोनिश्, शुचिश्रवाः ।
अमृतश्, शाश्वत स्थाणुर्, वरारोहो, महातपाः ॥ 13

सर्वगः, सर्व विद्, भानुर्, विष्वक्सेनो, जनार्दनः ।
वेदो, वेदविद्, अव्यङ्गो, वेदाङ्गो, वेदवित्, कविः ॥ 14

लोकाध्यक्षस्, सुराध्यक्षो, धर्माध्यक्षः, कृताकृतः ।
चतुरात्मा, चतुर्व्यूहश्, चतुर् दंष्ट्रश्, चतुर्भुजः ॥ 15

भ्राजिष्णुर्, भोजनं, भोक्ता, सहिष्णुर्, जगदादिजः ।
अनघो, विजयो, जेता, विश्व योनिः, पुनर्वसुः ॥ 16

उपेन्द्रो, वामनः, प्रांशुर्, अमोघः, शुचिर्, ऊर्जितः ।
अतीन्द्रस्, सङ्ग्रहस्, सर्गो, धृतात्मा, नियमो, यमः ॥ 17

वेद्यो, वैद्यः, सदायोगी, वीरहा, माधवो, मधुः ।
अतीन्द्रियो, महामायो, महोत्साहो, माहाबलः ॥ 18

महाबुद्धिर्, महावीर्यो, महाशक्तिर्, महाद्युतिः ।
अनिर्देश्यवपुः, श्रीमान्, अमेयात्मा, महाद्रिधृत् ॥ 19

महेष्वासो, महीभर्ता, श्रीनिवासस्, सतां गतिः ।
अनिरुद्धः, सुरानन्दो, गोविन्दो, गोविदां पतिः ॥ 20

मरीचिर्, दमनो, हंसः, सुपर्णो, भुजगोत्तमः ।
हिरण्य नाभस्, सुतपा, पद्मनाभः, प्रजापतिः ॥ 21

अमृत्युस्, सर्वदृक्, सिंहः, सन्धाता, सन्धिमान्, स्थिरः ।
अजो, दुर्मर्षनश्, शास्ता, विश्रुतात्मा, सुरारिहा ॥ 22

गुरूर् गुरुतमो, धाम, सत्यस्, सत्य पराक्रमः ।
निमिषः, अनिमिषः, स्रग्वी, वाचस्पतिर्, उदारधीः ॥ 23

अग्रणीर्, ग्रामणीः, श्रीमान्, न्यायो, नेता, समीरणः ।
सहस्र मूर्धा, विश्वात्मा, सहस्राक्षः, सहस्रपात् ॥ 24

आवर्तनो, निवृत्तात्मा, संवृतस्, संप्रमर्दनः ।
अहस् संवर्तको, वह्निर्, अनिलो, धरणीधरः ॥ 25

सुप्रसादः, प्रसन्नात्मा, विश्वसृग्, विश्वभुग् विभुः ।
सत्कर्ता, सत्कृतस्, साधुर्, जह्नुर्, नारायणो, नरः ॥ 26

असङ्ख्येयः, अप्रमेयात्मा, विशिष्टश्, शिष्टकृच्, छुचिः ।
सिद्धार्थस्, सिद्ध सङ्कल्पः, सिद्धिधस्, सिद्धि साधनः ॥ 27

वृषाही, वृशभो, विष्णुर्, वृषपर्वा, वृषोदरः ।
वर्धनो, वर्धमानश् च, विविक्तः, शृति सागरः ॥ 28

सुभुजो, दुर्धरो, वाग्मी, महेन्द्रो, वसुदो, वसुः ।
नैकरूपो, बृहद् रूपः, शिपिविष्टः, प्रकाशनः ॥ 29

ओजस् तेजो द्युति धरः, प्रकाशात्मा, प्रतापनः ।
ऋद्धस्, स्पष्टाक्षरो, मन्त्रस्, चन्द्रांशुर्, भास्कर द्युतिः ॥ 30

अमृतां शूद्भवो, भानुः, शशबिन्दुस्, सुरेश्वरः ।
औषधं, जगतस् सेतुः, सत्यधर्म पराक्रमः ॥ 31

भूत भव्य भवन्नाथः, पवनः, पावन, अनलः ।
कामहा, कामकृत्, कान्तः, कामः, काम प्रदः, प्रभुः ॥ 32

युगादि कृद्, युगावर्तो, नैकमायो, महाशनः ।
अदृश्यो, व्यक्त रूपश् च, सहस्रजित्, अनन्तजित् ॥ 33

इष्टो विशिष्टश्, शिष्टेष्टः, शिखण्डी, नहुषो, वृषः ।
क्रोधहा, क्रोधकृत्, कर्ता, विश्वबाहुर्, महीधरः ॥ 34

अच्युतः, प्रथितः, प्राणः, प्राणदो, वासवानुजः ।
अपान्निधिर्, अधिष्टानं, अप्रमत्तः, प्रतिष्टितः ॥ 35

स्कन्दस्, स्कन्दधरो, धुर्यो, वरदो, वायुवाहनः ।
वासुदेवो, बृहद्भानुर्, आदिदेवः, पुरन्दरः ॥ 36

अशोकस्, तारणस्, तारः, शूरः, शौरिर्, जनेश्वरः ।
अनुकूलश्, शता वर्तः, पद्मी, पद्म निभेक्षणः ॥ 37

पद्म नाभो, अरविन्दाक्षः, पद्म गर्भः, शरीरभृत् ।
महर्द्धिर्, ऋद्धो, वृद्धात्मा, महाक्षो, गरुड ध्वजः ॥ 38

अतुलः, शरभो, भीमः, समयज्ञो, हविर्हरिः ।
सर्व लक्षण लक्षण्यो, लक्ष्मीवान्, समितिञ्जयः ॥ 39

विक्षरो, रोहितो, मार्गो, हेतुर्, दामोदरः, सहः ।
महीधरो, महाभागो, वेगवान्, अमिताशनः ॥ 40

उद्भवः, क्षोबणो, देवः, श्रीगर्भः, परमेश्वरः ।
करणं, कारणं, कर्ता, विकर्ता, गहनो, गुहः ॥ 41

व्यवसायो, व्यवस्थानः, सम्स्थानः, स्थानदो, धृवः ।
परर्द्धिः, परम स्पष्टः, तुष्टः, पुष्टः, शुभेक्षणः ॥ 42

रामो, विरामो, विरतो, मार्गो, नेयो, नयः, अनयः ।
वीरश्, शक्ति मतां श्रेष्ठो, धर्मो, धर्म विदुत्तमः ॥ 43

वैकुण्ठः, पुरुषः, प्राणः, प्राणदः, प्रणवः, पृथुः ।
हिरण्य गर्भश्, शत्रुघ्नो, व्याप्तो, वायुर्, अधोक्षजः ॥ 44

ऋतुस्, सुदर्शनः, कालः, परमेष्ठी, परिग्रहः ।
उग्रस्, संवत्सरो, दक्षो, विश्रामो, विश्वदक्षिणः ॥ 45

विस्तारः, स्थावरस् थाणुः, प्रमाणं, बीजं अव्ययम् ।
अर्त्थः, अनर्थः, महाकोशो, महाभोगो, महाधनः ॥ 46

अनिर्विण्णः, स्थविष्ठो, भूर्, धर्मयूपो, महामखः ।
नक्षत्र नेमिर्, नक्षत्री, क्षमः, क्षामस्, समीहनः ॥ 47

यज्ञ, इज्यो, महेज्यश् च, क्रतुस्, सत्रं, सताङ्गतिः ।
सर्व दर्शी, निवृत्तात्मा, सर्वज्ञो, ज्ञानम् उत्तमम् ॥ 48

सुव्रतः, सुमुखस्, सूक्ष्मः, सुघोषः, सुखदः, सुहृत् ।
मनोहरो, जितक्रोधो, वीरबाहुर्, विदारणः ॥ 49

स्वापनस्, स्ववशो, व्यापी, नैकात्मा, नैक कर्म कृत् ।
वत्सरो, वत्सलो, वत्सी, रत्नगर्भो, धनेश्वरः ॥ 50

धर्मगुब्, धर्मकृद्, धर्मी, सदक्षरम्, असत्क्षरम् ।
अविज्ञाता, सहस्रांशुर्, विधाता, कृत लक्षणः ॥ 51

गभस्ति नेमिस्, सत्त्वस्थस्, सिंहो, भूत महेश्वरः ।
आदिदेवो, महादेवो, देवेशो, देवभृद्, गुरुः ॥ 52

उत्तरो, गोपतिर्, गोप्ता, ज्ञानगम्यः, पुरातनः ।
शरीर भूत भृद्, भोक्ता, कपीन्द्रो, भूरिदक्षिणः ॥ 53

सोमपः, अमृतपः, सोमः, पुरुजित्, पुरुसत्तमः ।
विनयो, जयः, सत्य सन्धो, दाशार्हः, सात्वतां पतिः ॥ 54

जीवो, विनयिता, साक्षी, मुकुन्दः, अमित विक्रमः ।
अम्भोनिधिर्, अनन्तात्मा, महोदधिशय, अन्तकः ॥ 55

अजो, महार्हः, स्वाभाव्यो, जितामित्रः, प्रमोदनः ।
आनन्दो, नन्दनो, नन्दः, सत्य धर्मा, त्रिविक्रमः ॥ 56

महर्षिः, कपिलाचार्यः, कृतज्ञो, मेदिनी पतिः ।
त्रिपदस्, त्रिद शाध्यक्षो, महाशृङ्गः, कृतान्त कृत् ॥ 57

महावराहो, गोविन्दः, सुषेणः, कनकाङ्गदी ।
गुह्यो, गभीरो, गहनो, गुप्तश्, चक्र गदा धरः ॥ 58

वेधाः, स्वाङ्गः, अजितः, कृष्णो, दृढः, सङ्कर्षण, अच्युतः ।
वरुणो, वारुणो, वृक्षः, पुष्कराक्षो, महामनाः ॥ 59

भगवान्, भगहा, नन्दी, वनमाली, हलायुधः ।
आदित्यो, ज्योतिर् आदित्यः, सहिष्णुर्, गतिसत्तमः ॥ 60

सुधन्वा, खण्ड परशुर्, दारुणो, द्रविण प्रदः ।
दिवस्पृक्, सर्वदृग्, व्यासो, वाचस्पतिर्, अयोनिजः ॥ 61

त्रिसामा, सामगः, साम, निर्वाणं, भेषजं, भिषक् ।
सन्न्यास कृच्, छमः, शान्तो, निष्ठा, शान्तिः, परायणम् ॥ 62

शुभाङ्गः, शान्तिदः, स्रष्टा, कुमुदः, कुवलेशयः ।
गोहितो, गोपतिर्, गोप्ता, वृषभाक्षो, वृषप्रियः ॥ 63

अनिवर्ती, निवृत्तात्मा, सङ्क्षेप्ता, क्षेमकृच्, छिवः ।
श्रीवत्स वक्षाः, श्रीवासः, श्रीपतिः, श्रीमतां वरः ॥ 64

श्रीदः, श्रीशः, श्रीनिवासः, श्रीनिधिः, स्रीविभावनः ।
श्रीधरः, श्रीकरः, श्रेयः श्रीमान्, लोक त्रयाश्रयः ॥ 65

स्वक्षः, स्वङ्गः, शतानन्दो, नन्दिर्, ज्योतिर् गणेश्वरः ।
विजितात्मा, विधेयात्मा, सत्कीर्तिश्, छिन्न संशयः ॥ 66

उदीर्णः, सर्वतश् चक्षुर्, अनीशः, शाश्वत स्थिरः ।
भूशयो, भूषणो, भूतिर्, अशोकः, शोक नाशनः ॥ 67

अर्चिष्मान्, अर्चितः, कुम्भो, विशुद्धात्मा, विशोधनः ।
अनिरुद्धः, अप्रतिरथः, प्रद्युम्नः, अमित विक्रमः ॥ 68

कालनेमि निहा, शौरिः, शूरः, शूर जनेश्वरः ।
त्रिलोकात्मा, त्रिलोकेशः, केशवः, केशिहा, हरिः ॥ 69

कामदेवः, कमपालः, कामी, कान्तः, कृतागमः ।
अनिर्देश्यवपुर्, विष्णुः, वीरः, अनन्तो, धनञ्जयः ॥ 70

ब्रह्मण्यो, ब्रह्मकृद् ब्रह्मा, ब्रह्म, ब्रह्म विवर्धनः ।
ब्रह्मविद्, ब्राह्मणो, ब्रह्मी, ब्रह्मज्ञो, ब्राह्मण प्रियः ॥ 71

महाक्रमो, महा कर्मा, महातेजा, महोरगः ।
महाक्रतुर्, महायज्वा, महायज्ञो, महाहविः ॥ 72

स्तव्यः, स्तव प्रियः, स्तोत्रं, स्तुतः, स्तोता, रणप्रियः ।
पूर्णः, पूरयिता, पुण्यः, पुण्य कीर्तिर्, अनामयः ॥ 73

मनोजवस्, तीर्थकरो, वसुरेता, वसुप्रदः ।
वसुप्रदो, वासुदेवो, वसुर्, वसुमना, हविः ॥ 74

सद्गतिः, सत्कृतिः, सत्ता, सद्भूतिः, सत्परायणः ।
सूरसेनो, यदु श्रेष्ठः, सन्निवासः, सुयामुनः ॥ 75

भूतावासो, वासुदेवः, सर्वासु निलय, अनलः ।
दर्पहा, दर्पदो, अदृप्तो, दुर्धरोथ, अपराजितः ॥ 76

विश्व मूर्तिर्, महा मूर्तिर्, दीप्त मूर्तिर्, अमूर्तिमान् ।
अनेक मूर्तिर्, अव्यक्तः, शत मूर्तिः, शताननः ॥ 77

एको, नैकः, स, वः, कः, किं, यत्, तत्, पदं अनुत्तमम् ।
लोक बन्धुर्, लोक नाथो, माधवो, भक्त वत्सलः ॥ 78

सुवर्ण वर्णो, हेमाङ्गो, वराङ्गश्, चन्दनाङ्गदी ।
वीरहा, विषमः, शून्यो, घृथाशीर्, अचलः, चलः ॥ 79

अमानी, मानदो, मान्यो, लोक स्वामी, त्रि लोक धृत् ।
सुमेधा, मेधजो, धन्यः, सत्यमेधा, धराधरः ॥ 80

तेजो वृषो, द्युति धरः, सर्व शस्त्र भृतां वरः ।
प्रग्रहो, निग्रहो, व्यग्रो, नैकश्रुङ्गो, गदाग्रजः ॥ 81

चतुर् मूर्तिः, चतुर् बाहुः, चतुर् व्यूहः, चतुर् गतिः ।
चतुर् आत्मा, चतुर् भावः, चतुर् वेदविद्, एकपात् ॥ 82

समावर्तो, निवृत्तात्मा, दुर्जयो, दुरतिक्रमः ।
दुर्लभो, दुर्गमो, दुर्गो, दुरावासो, दुरारिहा ॥ 83

शुभाङ्गो, लोक सारङ्गः, सुतन्तुस्, तन्तु वर्धनः ।
इन्द्र कर्मा, महा कर्मा, कृत कर्मा, कृतागमः ॥ 84

उद्भवः, सुन्दरः, सुन्दो, रत्न नाभः, सुलोचनः ।
अर्को, वाजसनिः, शृङ्गी, जयन्तः, सर्व विज्जयी ॥ 85

सुवर्ण बिन्दुर्, अक्षोभ्यः, सर्ववाग् ईश्वरेश्वरः ।
महा ह्रदो, महा गर्तो, महा भूतो, महा निधिः ॥ 86

कुमुदः, कुन्दरः, कुन्दः, पर्जन्यः, पावनः, अनिलः ।
अमृताशः, अमृत वपुः, सर्वज्ञः, सर्वतो मुखः ॥ 87

सुलभः, सुव्रतः, सिद्धः, शत्रुजित् छत्रुतापनः ।
न्यग्रोध उदुम्बरः, अश्वत्थः, चाणूरान्ध्र निषूदनः ॥ 88

सहस्रार्चिः, सप्त जिह्वः, सप्तैधाः, सप्त वाहनः ।
अमूर्तिर्, अनघः, अचिन्त्यो, भय कृद्, भय नाशनः ॥ 89

अणुर्, बृहत्, कृशः, स्थूलो, गुनभृन्, निर्गुणो, महान् ।
अदृतः, स्वदृतः, स्वास्यः, प्राग् वंशो, वंश वर्धनः ॥ 90

भारबृत्, कथितो, योगी, योगीशः, सर्व कामदः ।
आश्रमः, श्रमण, क्षामः, सुपर्णो, वायुवाहनः ॥ 91

धनुर् धरो, धनुर् वेदो, दण्डो, दमयिता, अदमः ।
अपराजितः, सर्वसहो, नियन्ता, नियमो, यमः ॥ 92

सत्त्ववान्, सात्त्विकः, सत्यः, सत्य धर्म परायणः ।
अभिप्रायः, प्रियार्ह, अर्हः, प्रिय कृत्, प्रीति वर्धनः ॥ 93

विहाय सगतिर्, ज्योतिः, सुरुचिर्, हुतभुग् विभुः ।
रविर्, विरोचनः, सूर्यः, सविता, रवि लोचनः ॥ 94

अनन्त हुतभुग् भोक्ता, सुखदो, नैकद, अग्रजः ।
अनिर्विण्णः, सदामर्षी, लोकाधिष्ठानं, अद्भुतः ॥ 95

सनात्, सनातन तमः, कपिलः, कपिरव्ययः ।
स्वस्तिदः, स्वस्ति कृत्, स्वस्ति, स्वस्ति भुक्, स्वस्ति दक्षिणः ॥ 96

अरौद्रः, कुण्डली, चक्री, विक्रमी, ऊर्जित शासनः ।
शब्दातिगः, शब्द सहः, शिशिरः, शर्वरीकरः ॥ 97

अक्रूरः, पेशलो, दक्षो, दक्षिणः, क्षमिणां वरः ।
विद्वत्तमो, वीत भयः, पुण्य श्रवण कीर्तनः ॥ 98

उत्तारणो, दुष् कृतिहा, पुण्यो, दुः स्वप्न नाशनः ।
वीरहा, रक्षणः, सन्तो, जीवनः, पर्यवस्थितः ॥ 99

अनन्त रूपः, अनन्त श्रीर्, जित मन्युर्, भयापहः ।
चतुरश्रो, गभीरात्मा, विदिशो, व्यादिशो, दिशः ॥ 100

अनादिर्, भूर्भुवो, लक्ष्मीः, सुवीरो, रुचिराङ्गदः ।
जननो, जन जन्मादिर्, भीमो, भीम पराक्रमः ॥ 101

आधार निलयो, धाता, पुश्पहासः, प्रजागरः ।
ऊर्ध्वगः, सत्पथाचारः, प्राणदः, प्रणवः, पणः ॥ 102

प्रमाणं, प्राण निलयः, प्राणधृत्, प्राण जीवनः ।
तत्त्वं, तत्त्व विद्, एकात्मा, जन्म मृत्यु जरातिगः ॥ 103

भूर् भुवः स्वस्तरुस्, तारः, सविता, प्रपितामहः ।
यज्ञो, यज्ञ पतिर्, यज्वा, यज्ञाङ्गो, यज्ञ वाहनः ॥ 104

यज्ञ भृद्, यज्ञ कृद्, यज्ञी, यज्ञ भुग्, यज्ञ साधनः ।
यज्ञान्त कृद्, यज्ञ गुह्यं, अन्नम्, अन्नाद एव च ॥ 105

आत्मयोनिः, स्वयं जातो, वैखानः, साम गायनः ।
देवकी नन्दनः, स्रष्टा, क्षितीशः, पाप नाशनः ॥ 106

शङ्ख भृन्, नन्दकी, चक्री, शार्ङ्ग धन्वा, गदा धरः ।
रथाङ्गपाणिर्, अक्षोभ्यः, सर्व प्रहरणायुधः । 107
सर्व प्रहरणायुध ॐ नम इथि ॥

** वनमाली गदी शार्ङ्गी शङ्खी चक्री च नन्दकी ।
श्रीमान् नारायणो विष्णुर् वासुदेवोऽभिरक्षतु । 108
श्री वासुदेवोऽभिरक्षतु ॐ नम इति ॥

---

## फल शृति

इतीदं कीर्तनीयस्य केशवस्य महात्मनः ।
नाम्नां सहस्रं दिव्यानां अशेषेण प्रकीर्तितम् ॥ 1

य इदं श्रुणुयान् नित्यं यश्चापि परिकीर्तयेत् ।
नाशुभं प्राप्नुयात् किञ्चित् सोऽमुत्रेह च मानवः ॥ 2

वेदान्तगो ब्राह्मणः स्यात् क्षत्रियो विजयी भवेत् ।
वैश्यो धन समृद्धः स्यात् छूद्रः सुखमवाप्नुयात् ॥ 3

धर्मार्थी प्राप्नुयाद् धर्मम् अर्थार्थी चार्थमाप्नुयात् ।
कामानवाप्नुयात् कामी प्रजार्थी चाप्नुयात् प्रजाः ॥ 4

भक्तिमान् यः सदोत्थाय शुचिस् तद्गत मानसः ।
सहस्रं वासुदेवस्य नाम्नां एतत् प्रकीर्तयेत् ॥ 5

यशः प्राप्नोति विपुलं ज्ञाति प्राधान्यम् एव च ।
अचलां श्रियमाप्नोति श्रेयः प्राप्नोति अनुत्तमम् ॥ 6

न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्दति ।
भवत्यरोगो द्युतिमान् बलरूप गुणान्वितः ॥ 7

रोगार्तो मुच्यते रोगाद् बद्धो मुच्येत बन्धनात् ।
भयान् मुच्येत भीतस्तु मुच्येतापन्न आपदः ॥ 8

दुर्गाण् यतितरत्याशु पुरुषः पुरुषोत्तमम् ।
स्तुवन् नाम सहस्रेण नित्यं भक्ति समन्वितः ॥ 9

वासुदेवाश्रयो मर्त्यो वासुदेव परायणः ।
सर्व पाप विशुद्धात्मा याति ब्रह्म सनातनम् ॥ 10

न वासुदेव भक्तानां अशुभं विद्यते क्वचित् ।
जन्म मृत्यु जरा व्याधि भयं नैवो पजायते ॥ 11

इमं स्तवमधीयानः स्रद्धा भक्ति समन्वितः ।
युज्येतात्म सुख क्षान्ति श्री धृति स्मृति कीर्तिभिः ॥ 12

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ॥ 13

द्यौः सचन्द्रार्क नक्षत्रा खं दिशो भूर् महोदधिः ।
वासुदेवस्य वीर्येण विधुतानि महात्मनाः ॥ 14

ससुरासुर गन्धर्वं सयक्षोरग राक्षसम् ।
जगत् वशे वर्ततेदं कृष्णस्य सचराचरम् ॥ 15

इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः ।
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च ॥ 16

सर्वागमानाम् आचारः प्रथमं परि कल्पितः ।
आचार प्रथमो धर्मो धर्मस्य प्रभुर् अच्युतः ॥ 17

ऋषयः पितरो देवा महाभूतानि धातवः ।
जङ्गमा जङ्गमं चेदं जगन् नारायणोद् भवम् ॥ 18

योगो ज्ञानं तथा साङ्ख्यं विद्याः शिल्पादि कर्म च ।
वेदाः शास्त्राणि विज्ञानं एतत् सर्वं जनार्दनात् ॥ 19

एको विष्णुर् महद्भूतं पृथग् भूतान्य नेकशः ।
त्रीन् लोकान् व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः ॥ 20

इमं स्तवं भगवतो विष्णोर् व्यासेन कीर्तितम् ।
पठेद्य इच्छेत् पुरुषः श्रेयः प्राप्तुं सुखानि च ॥ 21

विश्वेश्वरमजं देवं जगतः प्रभुम् अव्ययम् ।
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम् । 22
न ते यान्ति पराभव ॐ नम इति ॥

---

अर्जुन उवाच
पद्म पत्र विशालाक्ष पद्म नाभ सुरोत्तम ।
भक्तानां अनुरक्तानां त्राता भव जनार्दन ॥

श्री भगवान् उवाच
यो मां नाम सहस्रेण स्तोतुम् इच्छति पाण्डव ।
सोहऽमेकेन श्लोकेन स्तुत एव न संशयः ।
स्तुत एव न संशय ॐ नम इति ॥

व्यास उवाच
वासनाद् वासुदेवस्य वासितं भुवन त्रयम् ।
सर्वभूत निवासोऽसि वासुदेव नमोऽस्तु ते ।
श्री वासुदेव नमोऽस्तुत ॐ नम इति ॥

पार्वत्युवाच
केनोपायेन लघुना विष्णोर् नाम सहस्रकम् ।
पद्यते पण्डितैर् नित्यं श्रोतुम् इच्छाम्यहं प्रभो ॥

ईश्वर उवाच
** श्री राम राम रामेति रमे रामे मनोरमे ।
सहस्रनाम तत्तुल्यं राम नाम वरानने ।
श्री राम नाम वरानन ॐ नम इति ॥

ब्रह्मोवाच
नमोऽस्त्वनन्ताय सहस्र मूर्तये सहस्रपादाक्षि शिरोरु बाहवे ।
सहस्र नाम्ने पुरुषाय शाश्वते सहस्र कोटी युगधारिणे नमः ।
सहस्रकोटी युग धरिण ॐ नम इति ॥

सञ्जय उवाच
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर् विजयो भूतिर् ध्रुवा नीतिर् मतिर् मम ॥

श्री भगवान् उवाच
अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योग क्षेमं वहाम्यहम् ॥

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्म सम्स्थापनार्थाय संभवामि युगे युगे ॥

आर्ता विषण्णाः शिथिलाश्च भीताः
घोरेषु च व्याधिषु वर्तमानाः ।
सङ्कीर्त्य नारायण शब्द मात्रं
विमुक्त दुःखाः सुखिनो भवन्ति ॥

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्याऽऽत्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै
नारायणायेति समर्पयामि ॥
श्रीमन् नारायणायेति समर्पयामि ॥

**श्री विष्णु सहस्रनाम स्तोत्रम् संपूर्णम्**